CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 335

Title ṣoḍaśāra cakrakārikā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 335. Subject : vedic literature

Title : Ṣoḍaśāra çakrakārikā

Author : Bhadraśankar Scribe : —

Date of the work : — Date of the Ms. : V.S. ૧૮૬૭

Place of the work : — Place of the Ms. : —

Size : 9.6" by 6.5" Extent : 3 foll.

Language : Sanskrit. Script : Devanagari

Remarks :

शक्तिरिति ॥ तन्मध्ये ॥ अथ षोडशारचक्रकारिका लिख्यते ॥ तत्र गुरुर्वेद्यां मध्ये
त्रिहस्तव्यासं चतुरस्रं प्रसाध्य प्रागपरदक्षिणोत्तरं नव नव रेखाभिस्तच्च
तुःषष्टिकोष्ठकं कुर्यात् तत्र कोष्ठानि प्रत्येकं नवांगुलानि संपद्यंते ततो ब
हिरंत्यपंक्तिषु चतुर्दिक्षु मध्यकोष्ठानि चत्वारि मार्जयित्वा तदुपर्युपांत्य
पंक्तिषु पार्श्वयोस्त्रयं त्रयं त्यक्त्वा प्रतिदिशं मध्यकोष्ठद्वयं द्वयं मार्जयेत्
२८२ तेन चतुर्दिक्षु मध्यकोष्ठानि चत्वारि द्वाराणि सिध्यंति ततो मध्यस्थितषो
डशकोष्ठानि मार्जयेत् ततो बाह्ये एकैकं कोणकोष्ठकं विहाय कोणको
ष्ठद्वारपीठांतरालवर्त्तिन्यवशिष्टानि पंचपंच कोष्ठानि मार्जयेत् तदा
मध्यचतुरस्रपीठपादाः सिध्यंति ततो मध्याच्चत्वारि वृत्तानि कुर्यात् त
त्राद्ये चत्वार्यंगुलानि व्यासः द्वितीयेष्टौ तृतीये चतुर्विंशति चतुर्थे षड्विं

शतिरिति तच्चतुरंगुलं वृत्तं कर्णिकास्थं पीतेन रजसा पूरयित्वा कर्णिकावधि रे
खां सितेन रजसा निर्माय तद्बहिरष्टांगुलात्मके वृत्ते पीतरक्तसितरजोभिः संपादि
तमूलमध्याग्राणि षोडश केसराणि संपाद्य तत्केसरावधि रेखां सितेनैव पूरयित्वाथ
रजसांगुलात्तेन संपाद्य चतुर्विंशांगुलात्मके तद्बहिर्वृत्ते सितरजसा अष्टदिक्ष्व
ष्टौ पत्राणि रक्ताग्राणि कुर्यात् ततो दलांतरे रेखां सितेन रजसा विधाय दलांत
राणि कृष्णेन रजसा पूरयित्वा तद्बहिरेकांगुलांतरे बहिर्वृत्तरेखां सितेनैव र
जसा संपाद्य वृत्तद्वयांतरां परितो ष्टद्वलायतः संधिचिह्नैः षोडशधा विभज्य प्र
तिभागं यवाकारान् षोडशारान् श्यामपीतारुणश्वेत रजोभिः कल्पयित्वा तदंत
रा यथायोगं रजोभिः पूरयित्वा तद्बहिः सितपीतारुणश्यामहरिताः पंचरेखा
लिखेत् तद्बहिः पीठस्थैव चतुरस्रं यथाशोभं रजोभिरलंकृत्य पीतावधि रेखां सि
तेन रजसा चतुरस्रां रचयेत् द्वारदेशानि पूर्वादितः पीतश्यामश्वेतहरितरजो

नि: पूरयेत् आग्नेयादिकोणंकोष्टचतुष्टयं लोहितहरितश्यामधवलैः पूरये
त् आग्नेयादिपीठपादचतुष्टयं पंचकोष्टात्मकं क्रमात्सितरक्तपीतकृष्णैरेभि:
पूरयेत् ततः सितेन रजसांगुलोन्नतेन बहिश्चतुरस्रेरेखां कुर्यादिति पिताम
हचरणाः मदनाद्याश्च चक्रमेतच्चतुर्हस्तं चतुरस्रं तत्र प्रत्येकं द्वादशांगु
लानि कोष्ठानि वृत्तानि तु पंच तत्राद्ये वृत्ते चत्वार्यंगुलानि व्यासः द्वितीये ष्टौ
तृतीये विंशति चतुर्थे चतुर्विंशति पंचमे ष्टत्रिंशदिति पंचकोष्टात्मकं पी २
ठपादचतुष्टयं आग्नेयादिक्रमेण रक्तहरितश्यामसितैः पूरणीयं कोणको
ष्ठचतुष्टयं प्रत्येकं त्रिभिस्त्रिभिर्वर्णैरिति विशेषः इति षोडशारचक्रविधिः
तथा वज्रं प्रागुत्तमे भागे आग्नेयीं शक्तिमुज्वलां आलिखेद्दक्षिणे दण्डं नै
ऋत्यां खड्गमालिखेत् पाशं तु वारुणे लिख्यं ध्वजं वै वायुगोचरे कौबेर्यां तु गदा

लेख्यं ईशान्यां शूलमालिखेत् शूलस्य वामदेशे तु चक्रं पद्मं च दक्षिणे इति
ततो महावेद्युपरि पंचवर्णफलपुष्पोपशोभितं बध्नीयादिति ततो महावेदीशा
नभागे आयामदैर्घ्यौच्छ्रयैर्हस्तमितं यज्ञादिस्थापनार्थाय वेदिर्या विहितास्ति
हेमाद्रिमते वितस्त्युच्छ्रायावातस्यां सर्वतोभद्रं लिखेत् इति शुभमस्तु
लि० दी। भद्रशंकरेण सं० १८६७ श्रावणशुक्ल १४ शनौ। ॥ ३